**दिनाङ्क: 12.03.2026** **प्रात: - 06:55**

**प्रधानमन्त्री तिरुचगिरापल्लीः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः केरल-तमिल्नाडु-प्रदेशयोः षोडश-सहस्रकोटिरूप्यकाणां विविधविकासपरियोजनाः उद्घाटिताः। प्रधानमंत्री तमिलनाडुराज्यस्थस्य तिरुचिरापल्ली-नगरस्य पञ्जप्पुर-क्षेत्रे विविध-परियोजनानां शिलान्यासं सार्धपञ्चसहस्रतोऽधिक-कोटिरूप्यकाणां सम्पन्न-परियोजनानां राष्ट्रार्पणञ्च अकरोत्। अस्मिन् अवसरे श्रीमोदी अवदत् यत् केन्द्र-सर्वकारेण आरब्धानां मूलसंरचन-विकास-कार्यक्रमाणां सम्पर्काभिवृद्धि-पूर्वकं, स्थानीय-अर्थव्यवस्थायाः अभिवृद्धिञ्च प्रशासनं करिष्यति, येन स्थानीयलोकाय वृत्यवसराश्च वर्धयिष्यन्तीति।

प्रधानमन्त्री द्वयोः अमृतभारत एक्स्प्रेस-रेलयानयोः, द्वयोः नियमित-एक्स्प्रेस-रेलयानयोः, एकस्य च यात्रि-रेलयानसेवायाः ध्वजप्रदर्शनपूर्वकम् उद्घाटनमकरोत्। श्रीमोदी इण्डियन्-आयल-कार्पोरेशन् इत्यस्य ल्यूब्-ब्लेण्डिङ्ग्-प्लाण्ट् इत्यस्यापि लोकार्पणमकरोत्। कार्यक्रमे भाषमाणः प्रधानमन्त्री अवदत् यत् राज्यस्य विकासाय सर्वकारः अहर्निशं कार्यं कुर्वन्नस्तीति।

**<u>अद्यतनीयं संसत्</u>**

राज्यसभायां अद्य ग्रामविकासमन्त्रालयस्य कार्याणां विषये आधिक्येन चर्चा भविष्यति। लोकसभायां, वित्तमन्त्री निर्मला सीतारामनः अस्य वित्तीयवर्षस्य सेवाभ्यः भारतस्य सञ्चितनिधितः बहिस्तादपि कतिपय-धनराशीं दातुं विनियोजयितुञ्च सत्रस्यास्य विनियोजन-विधेयकम् प्रस्थापयिष्यति। श्वः लोकसभायां विपक्षिणाम् सभाध्यक्षस्य ओम् बिर्ला इत्यस्य निष्कासन-प्रस्तावः ध्वनिमतेन निराकृतः।

**राष्ट्रपति-जीसीडब्ल्यूएएस-2026**

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य नवदेहली-नगरे कृषि-खाद्य-प्रणाल्यां महिलानां भूमिकेति विषयकं वैश्विक-सम्मेलनम् उद्घाटयिष्यति। केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अपि अस्मिन् अवसरे उपस्थितः भविष्यति।

**पश्चिम-एशियायाः वर्तमानविकासः**

पेट्रोलियम-प्राकृतिकवात्यन्धन-मन्त्रालयस्य संयुक्तसचिवेन सुजाता शर्मा इत्यनया उक्तं यत् भारतस्य अशोधित-तैला-पूर्तिः सुरक्षितास्ति देशस्य च अशोधितस्य तैलायातस्य प्रायः सप्तति-प्रतिशतं भागं अधुना होर्मुज़्-जलसंधिः इत्यस्मात् बहिः अस्तीति। ह्यः नवदेहल्यां पश्चिम-एशियायाः वर्तमानस्थितिः इति विषये अन्तर्मन्त्रालयीयं विवरणं प्रकाशयन्ती, सा एतत् उक्तवती।

**पश्चिम-एशिया-द्वन्द्वः**

पश्चिम-एशियायाः चिन्ताप्रदा स्थितिः तीव्रतया वर्धमाना अस्ति। इरान्-देशः पर्शियन्-गल्फ़ेति क्षेत्रे वाणिज्यिक-नौवहनं लक्ष्यीकृत्य यू. ए. ई. मध्ये विमानयानस्य मूलसौकर्ये आक्रमणं कृतवान्। अबू धाबी-नगरस्य अधिकारिणः अवदन् यत् पुरातनस्य अबू धाबी-विमानस्थानकं निकषा अग्निप्रकोपः अभवत्, वायु-रक्षा-व्यवस्थया च आपदा निवारिता। पूर्वं मार्च्-मासस्य एकादश-दिनाङ्के, दुबै-अन्ताराष्ट्रिय-विमानस्थानके ड्रोनाक्रमणेन भारतीय-नागरिकसहितं चतुर्जनाः व्रणिताः अभवन्।

**कतर-परामर्शः**

कतर-देशे भारतीय-दूतावासः सूचितवान् यत्, देशे विलम्बितान् पञ्चशततोऽधिकान् भारतीयान्, स्वीकृत्य गतरात्रौ कतर-एयर्वस इति विमानानि नवदेहल्या सह अन्यस्थानानि च प्रति प्रस्थितानि।

**आईपीएल 2026**

भारतस्य क्रिकेट्-नियन्त्रण-मण्डलेन बी. सी. सी. आई. इत्यनेन अस्य वर्षस्य इण्डियन्-प्रीमियर्-लीग इत्युक्ते आई.पी. एल. इत्यस्य प्रथमचरणीय-कार्यक्रमाणां घोषणा कृता। क्रीडैषा अस्य वर्यस्य अष्टाविंशति-मार्चतः

एप्रिल मासस्य द्वादश-दिनाङ्क-पर्यन्तं क्रीडिष्यन्ते।